दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-327 | 1 | सितम्बर 22, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् आश्विन्शुक्लप्रतिपदा
आश्विन ०७ प्रविष्ठांशः मङ्गलमयः भवेत्


2 आपदानन्तरं सांस्कृतिकसंरक्षणाय एवं मन्दिराणां विकासाय च प्रतिबद्धः सर्वकारः, ₹550 कोटिरुप्यकाणि अनुमोदितानि

3 एच्-१बी वीजानीतेः विषये अमेरिकादेशेन महत्त्वपूर्णं स्पष्टीकरणम् अधिसूचितम्

4 श्रीमद्भागवतप्रवचनम् - ३४ नारदमुनिः अब्रवीत्- 'धन्योऽस्मि, अनुगृहीतोऽस्मि अहम्। अहं सर्वपापहारिणं भगवन्तं श्रीहरिं प्राप्तवान्


## “नेक्स्ट जनरेशन जी.एस.टी.” परिष्कारः नवरात्र्याः प्रथमदिनात् प्रवर्तयिष्यति

### सममेव एतैः परिष्कारैः राष्ट्रस्य विकासगाथा परिवर्तिता भविष्यति- प्रधानमन्त्री नरेन्द्रमोदी

**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् नेक्स्ट जनरेशन जी.एस.टी. परिष्कारः नवरात्र्याः प्रथमदिनात् प्रवर्तयिष्यति। राष्ट्रम् संबोधयन् श्रीमोदी अवदत् यत्, जी.एस.टी. बचत-उत्सवः आरभ्यते, जनाः स्वेच्छया वस्तूनि न्यूनमूल्येन क्रेतुं शक्नुवन्ति। सः अवदत् यत् एतैः परिष्कारैः राष्ट्रस्य विकासगाथा परिवर्तिता भविष्यति तथा च युवकाः, मध्यमवर्गः, कृषकाः, महिलाः, उद्यमिनः च अस्य बचत-उत्सवेन लाभान्विताः भविष्यन्ति। राष्ट्रस्य विकासयात्रायां प्रत्येकं राज्यं समानसहभागी भविष्यति इति सः अवधानं दत्तवान्।



सः अग्रिमांशस्य जी.एस.टी. परिष्काराणां कृते, बचत-उत्सवस्य नवरात्रि-उत्सवस्य च कृते राष्ट्राय शुभाशयाः प्रेषितवान्। प्रधानमन्त्री अवदत् यत् तस्य सर्वकारेण करव्यवस्थां सरलीकृतम्। सः अवोचत् यत् तस्य सर्वकारः चतुर्दशाधिक-द्विसहस्रतमे वर्षे सत्ताग्रहणानन्तरं राज्यैः हितधारकैः च सह परामर्शं कृत्वा जी.एस.टी. इत्यस्य कृते प्राधान्यम् अददात् । विगतेषु द्वादश वर्षेषु पञ्चविंशतिः कोटिजनाः दारिद्र्यात् बहिः समागताः इत्यस्मिन् विषये प्रधानमन्त्री हर्षं प्रकटितवान्। सः अवदत् यत् मध्यमवर्गस्य स्वकीयाः अभिलाषाः सन्ति, तथा च तेषां करभारं शमनाय सर्वकारेण कृताः उपायाः अधोरेखितवान्। श्रीमोदी अवदत् यत् तस्य सर्वकारः नागरिक देवो भवः इत्यनेन मन्त्रेण अग्रे गच्छति।

## सुभाषितम्

**सत्यस्य वचनं श्रेयः,**
**सत्यादपि हितं वदेत्।**
**यद्भूतहितमत्यन्तम्**
**एतत् सत्यं मतं मम॥**

अर्थात्- यद्यपि सत्य वचन बोलना श्रेयस्कर है तथापि उस सत्य को ही बोलना चाहिए जिससे सर्वजन का कल्याण हो। मेरे (श्लोककर्ता नारद के) विचार से तो जो बात सभी का कल्याण करती है वही सत्य है।

## नूतनशिक्षानीतिः छात्राणां शिक्षणस्य सफलतायाः सूत्रम् अस्ति- शिक्षामन्त्री धर्मेन्द्रप्रधानः




**हिमसंस्कृतवार्ताः** - केन्द्रीय शिक्षामन्त्री धर्मेन्द्रप्रधानः उक्तवान् यत् नूतनशिक्षानीतिः छात्राणां शिक्षणस्य सफलतायाः सूत्रम् अस्ति। गतदिवसे आईआईटी चेन्नई-नगरे दक्षिणापथ-शिखरसम्मेलनं सम्बोधयन् मन्त्री अवदत् यत् सप्तचत्वारिंशदधिकद्विसहस्रतमं वर्षं यावत् विकसितस्य भारतस्य लक्ष्यं प्राप्तुं विद्यालयीय-शिक्षायां केचित् परिवर्तनानि भवितव्यानि, येन उच्च-माध्यमिक शिक्षा प्राप्तानन्तरं छात्राणां विकासः भवेत्। शिक्षामन्त्री अवदत् यत् विद्यालयीय शिक्षायाः कौशलपक्षे ध्यानं दातव्यम्। अतः एव नूतनशिक्षानीत्यां षष्ठश्रेणीतः कौशलशिक्षा कार्यान्विता अस्ति।

## प्रधानमन्त्री नरेन्द्रमोदी अरुणाचलप्रदेश-त्रिपुरा-राज्ययोः यात्रां करिष्यति



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी अरुणाचलप्रदेश-त्रिपुरा-राज्ययोः यात्रां करिष्यति। अस्मिन् यात्रावधौ सः एकशताधिक-पञ्चसहस्रकोटिरूप्यकाणां अनेकविकासपरियोजनानां उद्घाटनं करिष्यति। श्रीमोदी अरुणाचलप्रदेशे सप्तशताधिक-त्रिसहस्र-कोट्यधिक-रूप्यकाणां द्वयोः प्रमुखयोः जलविद्युत्प्रकल्पयोः आधारशिलां स्थापयिष्यति। प्रधानमंत्री तवांग नगरे एकस्य अत्याधुनिक-सम्मेलन-केन्द्रस्य आधारशिलां स्थापयिष्यति। प्रधानमंत्री नवत्यधिकद्विशतोत्तरैक-सहस्रकोट्यधिकरूप्यकाणां विविध-मूलभूत-परियोजनानां शुभारंभं करिष्यति। एताभिः परियोजनाभिः स्वास्थ्य, अग्निसुरक्षा, कार्यरताः महिलाः च लाभान्विताः भविष्यन्ति। अस्मिन् अवसरे श्रीमोदी ईटानगरे एकां जनसभां अपि सम्बोधयिष्यति। सः स्थानीयकरदातृभिः, व्यापारिभिः, उद्योगप्रतिनिधिभिश्च सह वस्तु सेवाकरस्य प्रभावि कुशीदानामाधृत्य चर्चा करिष्यति। असौ त्रिपुरायां तीर्थयात्रा पुनरुद्धार कार्यं समेत्य आध्यात्मिक-विरासत-संवर्धन-अभियान-योजनायाः अन्तर्गतं माताबाड़ी क्षेत्रे माता-त्रिपुरा-सुंदरी-मंदिर-परिसरस्य विकास-कार्यस्य उद्घाटनं अपि करिष्यति।

## रक्षामन्त्री राजनाथसिंहः द्विदिवसीय-यात्रायै मोरक्को देशं प्रति प्रस्थितवान्

हिमसंस्कृतवार्ताः - रक्षामन्त्री राजनाथसिंहः द्विदिवसीय-यात्रायै मोरक्को देशं प्रति प्रस्थितवान्। ध्यातव्यं वर्तते यत् कश्चन् भारतस्य रक्षामंत्रिणः मोरक्को देशस्य इयं प्रथमा यात्रा भविष्यति, यत् द्वयोः देशयोः मध्ये वर्धमानं सामरिकं सहयोगं प्रतिबिम्बयति। अस्मिन् यात्रावधौ रक्षा, सामरिकं, औद्योगिक-सहयोगं च सुदृढीकर्तुं सः मोरक्कोदेशस्य रक्षामन्त्रिणा अब्देलतीफ लाउदी इत्यनेन सह द्विपक्षीयोपवेशनं करिष्यति । असौ बरशीद-नगरे टाटा एडवांस्ड सिस्टम्स मोरक्को समवायस्य व्हील्ड आर्मर्ड प्लेटफ़ॉर्म इत्यस्य नूतन-विनिर्माण-संयंत्रस्य उद्घाटने सम्मिलितो भविष्यति। एतत् अफ्रीकादेशे प्रथमं भारतीयरक्षा विनिर्माणसंयंत्रं अस्ति। आत्मनिर्भर-भारत-पदक्षेपान्तर्गतम् देशस्य रक्षा-उद्योगस्य वर्धमाने वैश्विक प्रभावे एषा महत्त्वपूर्णा उपलब्धिः अस्ति।




प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp


**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**


कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११


## वर्ल्डस्पीड-स्कैटिंग-चैंपियनशिप-प्रतिस्पर्धायां भारतस्य आनंदकुमार-वेलकुमारेण स्वर्ण-पदकम् विजितम्



हिमसंस्कृतवार्ताः - चीनदेशे प्रचलिते वर्ल्ड-स्पीड-स्कैटिंग-चैंपियनशिप इति प्रतिस्पर्धायां भारतस्य आनंदकुमार वेलकुमारेण पुरूषयुगलवर्गस्य द्विचत्वारिंशत् किलोमीटर मितस्य मैराथन-स्पर्धायां स्वर्णपदकम् विजितम्।

# आपदानन्तरं सांस्कृतिकसंरक्षणाय एवं मन्दिराणां विकासाय च प्रतिबद्धः सर्वकारः, ₹550 कोटिरुप्यकाणि अनुमोदितानि




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलस्य लोकसंस्कृतिः, समृद्धाः परम्पराः च विश्वप्रसिद्धाः सन्ति। अत्रत्यानि भव्यमन्दिराणि ऐतिहासिकस्थलानि च शताब्दशः जनानां आकर्षणकेन्द्रं भवन्ति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः इत्यस्य दूरदर्शी नेतृत्वे राज्यसर्वकारः राज्यस्य सांस्कृतिकन्यासस्य संरक्षणाय सक्रियरूपेण कार्यं कुर्वन् अस्ति। अस्य कृते राज्यसर्वकारेण आहत्य ₹५५० कोटिभ्यः अधिकं धनम् अनुमोदितम् अस्ति।राज्ये प्राचीनमन्दिराणि, दुर्गाणि, पुरातत्त्वस्थलानि च प्रायः ₹५० कोटिरूप्यकाणां व्ययेन नवीनीकरणं क्रियन्ते। राज्यसर्वकारेण अधिग्रहीतमन्दिरेषु विविधविकासकार्यस्य कृते प्रायः ₹३७ कोटिरूप्यकाणां अनुमोदनं कृतम् अस्ति। भक्तानां सुविधायै माताश्रीचिन्तपूर्णीमन्दिरे अगस्त २०२३ तमे वर्षे 'सुगमदर्शनव्यवस्था' प्रारब्धा। एतस्याः सुविधायाः कारणात् मन्दिरे सम्मर्दव्यवस्थापनं सुगमं जातम्। वृद्धाः विशेषसमर्थाः च अधुना मन्दिरे सुलभदर्शनं कुर्वन्ति। ऑनलाइन भोजनारक्षणं ऑनलाइन दर्शनम् इत्यादीनि डिजिटलसेवाः अपि प्रवर्तन्ते। राज्यस्य अन्येषु मन्दिरेषु शीघ्रमेव एषा सुविधा कार्यान्विता भविष्यति।

धार्मिकपर्यटनस्य प्रवर्धनार्थं महत्त्वाकांक्षिणः योजनाः कार्यान्विताः सन्ति। माताश्री चिन्तपूर्णीमन्दिरस्य कृते ₹56.26 कोटिरूप्यकाणां अनुमोदनं कृतम्। प्रायः ₹250 कोटिरूप्यकाणां व्ययेन भव्यसङ्कुलस्य निर्माणं क्रियते। माताश्री ज्वालाजी तथा माताश्री नैनादेवीमन्दिरेषु ₹100 कोटिरूप्यकाणि अपि अनुमोदितानि सन्ति। मन्दिरपुरोहितानाम् अपि विशेषप्रशिक्षणं क्रियते। अधुनैव माताश्रीचिन्तपूर्णीमन्दिरस्य १५ पुरोहिताः माताश्री नैनादेवीमन्दिरस्य १० पुरोहिताः बनारसहिन्दूविश्वविद्यालयद्वारा ऑनलाइन प्रशिक्षणं प्राप्तवन्तः। हिमाचलस्य समृद्धसांस्कृतिकन्यासस्य संरक्षणार्थं प्रायः ₹११.१६ कोटिरूप्यकाणां अनुमोदनं कृतम्। तदतिरिक्तं नियमितमन्दिरपूजायाः, आधारभूतसंरचनानां च उन्नतीकरणाय ₹१ कोटिरूप्यकाणां वार्षिकम् अनुदानं प्रदत्तं भवति। लघुमन्दिरेभ्यः पूजार्थं प्रदत्तं धनं २०२५-२६ तमे वर्षे द्विगुणितम् अस्ति।राज्यसर्वकारेण शिमलानगरस्य ऐतिहासिकस्य बैन्टोनी-दुर्गस्य नवीनीकरणं कृत्वा तस्य नूतनरूपं दत्तम्। अत्र २०२३ तमस्य वर्षस्य सितम्बरमासे प्रकाश-ध्वनि-प्रदर्शनस्य आरम्भः भविष्यति। अतिरिक्तं शीघ्रमेव डिजिटल-सङ्ग्रहालयस्य स्थापना भविष्यति। अस्याः परियोजनायाः कृते प्रायः ₹25 कोटिरूप्यकाणि स्वीकृतानि सन्ति। स्थानीयशिल्पस्य, भोजनस्य च प्रचारार्थं परिसरे "पहाड़ी आंगन" इति केन्द्राणि अपि स्थापितानि सन्ति, ये डिल्ली हाट इत्यस्य पङ्क्तौ आकर्षणस्य केन्द्रं भवन्ति।जिलामुख्यालये लघु-लघु-प्रेक्षागृहाणि निर्मीयन्ते। राज्यस्य पञ्चसु मण्डलेषु एते सभागाराः सम्पन्नाः सन्ति। राष्ट्रिय-राज्यस्तरीयमेलानां कृते २०२३-२४ तमे वर्षे ₹६६.५० लक्षरूप्यकाणां, २०२४-२५ तमे वर्षे १.१० कोटिरूप्यकाणां च सहायता प्रदत्ता। २०२३-२४ तमे वर्षे सांस्कृतिक-क्रियाकलापानां कृते सार्वजनिकसंस्थानां कृते ₹७०.४० लक्षरूप्यकाणि, २०२४-२५ तमे वर्षे ५८.३५ लक्षरूप्यकाणि च आवंटितानि सन्ति।हिमाचलराज्यसङ्ग्रहालयः, शिमला, जनवरी २०२४ तमे वर्षे स्वस्य ५० वर्षाणि पूर्णानि अकरोत्। सङ्ग्रहालयस्य आकर्षणं, सूचनाप्रदं च सामग्रीं वर्धयितुं सचेतनप्रयत्नाः प्रचलन्ति आगन्तुकानां कृते संग्रहालयस्य २८ चित्रशालासु प्रदर्शितानां १५०० तः अधिकानां दुर्लभवस्तूनाम् प्रदर्शनं प्रदत्तं भवति। शिमला संगीतमहोत्सवः, हिममहोत्सवः, दिल्ली हाट इत्यादयः कार्यक्रमाः अपि आयोज्यन्ते। संस्कृत-टाङ्करी- लिप्याः प्रशिक्षणकार्यशालाः अपि आयोज्यन्ते। राज्यसर्वकारस्य एते प्रयत्नाः ऐतिहासिकस्थलानां संरक्षणे, आधारभूतसंरचनाविकासे, पर्यटनविकासे च आधारभूताः सिद्धाः भविष्यन्ति।

# हिमाचलप्रदेशः सुक्खूसर्वकारः विद्युत्- उपभोक्तृ- मित्राणां नियुक्तिः करिष्यति।

## का भविष्यति शैक्षणिक-योग्यता ?



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः इत्यस्य नेतृत्वे राज्यसर्वकारेण राज्ये सर्वत्र विद्युत्सेवानां अधिकं सुदृढीकरणाय हिमाचलप्रदेश- राज्यविद्युन्मण्डलसीमिते (एचपीएसईबीएल) १,६०२ विद्युत् उपभोक्तृमित्राणां १,००० टी-मेट- इत्येतेषां च नियुक्तेः अनुमोदनं कृतम् अस्ति। अन्तिमेषु दशकेषु प्रथमवारं सर्वकारस्वामित्वयुक्तस्य कम्पन्याः इतिहासे एतावता बहूनां युनां नियुक्तिः भविष्यति।क्षेत्रकर्मचारिणाम् अभावं निवारयितुम् उपभोक्तृभ्यः अबाधितविद्युतापूर्तिं सुनिश्चित्य च एषः निर्णयः कृतः इति सर्वकारस्य प्रवक्ता अवदत्। सम्प्रति ४,००९ स्वीकृतानि टी-मेट-पदानि सन्ति, येषु ३,०४९ रिक्तानि सन्ति, येन परिचालनसमस्याः उत्पद्यन्ते, सेवानां गुणवत्ता च प्रभाविता भवति। एतस्याः स्थितिः सम्बोधयितुं सर्वकारेण सर्कलस्तरस्य रिक्त-टी-मेट-पदानां स्थाने १,००० टी-मेट-पदानि पूरयितुं १,६०२ विद्युत्- उपभोक्तृ-मित्राणि नियोक्तुं च निर्णयः कृतः अस्ति।विद्युत्- उपभोक्तृमित्राणां नियुक्तिः एकेन अधिकृतैः सर्वकारीय-संस्थाद्वारा पात्रेभ्यः अभ्यर्थिभ्यः भविष्यति, ये दशमीकक्षां उत्तीर्णां कृत्वा मान्यताप्राप्त-संस्थायाः विद्युत्/ वायरमैनव्यापारे ITI प्रमाणपत्रं प्राप्तवन्तः सन्ति। आवेदकानां कृते निर्धारिता आयुःसीमा १८ तः ३० वर्षाणि यावत् भवति।प्रवक्ता अवदत् यत् क्षेत्रकर्मचारिणः एचपीएसईबीएल- इत्यस्य मेरुदण्डाः सन्ति, कुशलसेवानां माध्यमेन निर्बाध विद्युतापूर्तिः सुनिश्चितं कुर्वन्ति तथा च आपत्सु विद्युत्पुनर्स्थापनं क्षतिग्रस्तविद्युत्संरचनानां पुनर्स्थापनं च महत्त्वपूर्णां भूमिकाः निर्वहन्ति। विद्युत्क्षेत्रे कार्यबलस्य सुदृढीकरणेन उपभोक्तृणां लाभः भविष्यति। सः अवदत् यत् एषा उपक्रमः विद्युत् उपभोक्तृणां कृते उत्तमसेवाः सुनिश्चित्य स्थानीययुनां कृते जीविकायाः अवसरान् प्रदातुं सर्वकारस्य प्रतिबद्धतां प्रतिबिम्बयति।मुख्यमन्त्री उक्तवान् यत् वर्तमानसर्वकारस्य कार्यकाले अद्यावधि २३,१९१ युनां कृते सर्वकारीयक्षेत्रे जीविका प्रदत्ता अस्ति। सः अपि अवदत् यत् भविष्ये राज्यसर्वकारः युनां कृते नूतनानां जीविकानां, स्वजीविकानां च अवसरान् सृजति।

# हिमाचलप्रदेशसर्वकारस्य आयुषविभागः श्वः मंगलवासरे सम्पूर्णे राज्ये आयुर्वेददिवसम् आचरिष्यति




हिमाचलप्रदेशसर्वकारस्य आयुषविभागः 23 सितम्बर 2025 दिनाङ्के सम्पूर्णे राज्ये आयुर्वेददिवसः अतीव उत्साहेन आचरिष्यति।अस्मिन् अवसरे राज्यस्य विभिन्नेषु जनपदेषु आउटरीचस्वास्थ्यशिबिराणि, जनजागरणव्याख्यानानि, संवेदीकरणकार्यक्रमाः च आयोजिताः भविष्यन्ति, यस्योद्देश्यं पारम्परिकचिकित्साप्रथानां महत्त्वं लाभं च सामान्यजनपर्यन्तं प्रसारयितुं भविष्यति। उत्सवस्य मुख्यविषयः "आयुर् मन्थन्: हिमाचले आयुषः - सततविकासाय मार्गचित्रम्" इति शीर्षकेण एकदिवसीयसम्मेलनं भविष्यति। सम्मेलनस्य अध्यक्षः हिमाचलप्रदेशस्य आयुषमन्त्री भविष्यति, तत्र वरिष्ठसरकार्यस्य अधिकारिणः, विषयविशेषज्ञाः, उद्योगप्रतिनिधयः, समुदायस्य हितधारकाः च उपस्थिताः भविष्यन्ति। सम्मेलने आयुषक्षेत्रस्य सामरिकमार्गचित्रस्य विषये चर्चा भविष्यति। आयुष-औषध-उद्योगाय गैर-काष्ठ-वन-उत्पादानाम् शोषणं, सर्वकार-सञ्चालित-आयुष-औषधालयानाम् मान्यताप्राप्त-विश्वसनीय-ब्राण्ड्-रूपेण परिवर्तनं, राज्यस्य प्राकृतिक-सौन्दर्येन सह पारम्परिक-उपायानां संयोजनेन आयुष-स्वास्थ्य-पर्यटनस्य प्रवर्धनं च इति त्रयेषु प्रमुखेषु विषयेषु विशेषतया ध्यानं दीयते |.




# ( १. शैलपुत्री)

## प्रथमनवरात्र-विशेषः

**ॐ वन्दे वांछितलाभाय चन्द्रार्धकृत शेखराम्।**
**वृषारूढ़ा शूलधरां शैलपुत्री यशस्वनीम्॥**

मातुः दुर्गायाः नवशक्त्यः सन्ति । नवरात्रेषु प्रतिदिनं नवशक्तिनां पूजनं भवति। मातुः नवदुर्गायाः नवशक्तिषु प्रथमं स्वरूपं शैलपुत्र्याः वर्तते। नवरात्रस्य प्रथमे दिने मातुः दुर्गायाः प्रथमस्वरूपस्य 'शैलपुत्र्याः' पूजनं क्रियते। प्रथमे नवरात्रे घटस्थापनेन साकं मातुः पूजा आरब्धा भवति। कलशोपरि मातुः प्रतिमायाः प्रतिष्ठा भवति। नवदुर्गामूर्तिः कस्यापि धातोः मृत्तिकायाः वा भवितुम् अर्हति । कलशस्य पृष्ठभागे स्वस्तिकं युग्मपार्श्वे च त्रिशूलम् निर्मीयते। शैलपुत्र्याः पूजनेन 'मुलाधारचक्रं' जागृतं भवति। यस्य कारणेन अनेकविधाः उपलब्धयः प्राप्यन्ते। पर्वतराजस्य हिमालयस्य गृहे कन्यारूपेण जन्मनत्वाद् मातुः नाम शैलपुत्री इति अभवत् । देव्याः वाहनं वृषभं वर्तते दक्षिणे हस्ते त्रिशूलं वामहस्ते च पद्मं विभूषयते। पूर्वजन्मनि सा प्रजापतेः दक्षस्य कन्या जाता । तदा तस्याः नाम सती आसीत् । तस्याः विवाहः भगवान् शङ्करेण सह अभवत् । एकदा सा पितुः यज्ञं गता तत्र भर्तुः शङ्करस्य अपमानं सा सोढुं न शक्तवती । तया तत्र योगाग्नौ स्वशरीरं दग्धम् । अग्रिमे जन्मनि शैलराजः हिमालयस्य कन्यारूपेण जन्मप्राप्य शैलपुत्री इति नाम्ना प्रसिद्धा अभवत् । अस्मिन् जन्मनि अपि शैलपुत्रीदेवी शिवस्य पत्नी अभवत् । नवदुर्गासु प्रथमायाः शैलपुत्र्याः महत्वं एवं शक्तयः अनन्ताः सन्ति । नवरात्रपूजायाः प्रथमे दिने अस्याः एवं पूजा उपासना च भवति। अस्मिन् दिने पूजायां योगिनः मूलाधारचक्रे मनः स्थापयन्ति । अत्रैव तस्य योगाभ्यासः आरभ्यते ।

नवार्णमन्त्रः - **ॐ ऐं ह्रीं क्लीं चामुण्डाय विच्चे**

शैलपुत्र्याः मन्त्रः - **ॐ शं शैलपुत्री देव्यैः नमः।**

# एच्-१बी वीजानीतेः विषये अमेरिकादेशेन महत्त्वपूर्णं स्पष्टीकरणम् अधिसूचितम्




**हिमसंस्कृतवार्ताः।** अमेरिकादेशेन नूतनस्य एच्-१बी वीजानीतेः विषये महत्त्वपूर्णं स्पष्टीकरणम् अधिसूचितम् अस्ति । तेनोक्तं यत् अनया नीत्या प्रौद्योगिकी-उद्योगे भ्रमः चिन्ता च उत्पन्ना अस्ति । स्पष्टीकरणे उक्तं यत् $१००,००० शुल्कं केवलं नूतनानां आवेदकानां कृते एव आरोपितं भविष्यति, यस्य "एकवारं" भुक्तिः भविष्यति। नूतननीतेः प्रभावात् घण्टाभिः पूर्वं व्हाइट हाउस इत्यस्य प्रेससचिवः कैरोलिन् लेविट् इत्यनेन उक्तं यत् येषां कृते पूर्वमेव एच्-१ बी वीजा अस्ति तथा च वर्तमानकाले देशात् बहिः सन्ति तेषां पुनः प्रवेशशुल्कं एकलक्षं डॉलरं न गृह्यते। एतेन नवीकरणेषु वर्तमानवीजाधारकाणां स्थितिः न प्रभाविता भविष्यति। नूतनवीजाघोषणा वर्तमानस्य लॉटरीप्रक्रियायां प्रभावं न करिष्यति। प्रेससचिवः अवदत् यत् अग्रिमायां लॉटरीप्रक्रियायां प्रथमं एषः नूतनः आदेशः कार्यान्वितः भविष्यति। डोनाल्ड ट्रम्प प्रशासनस्य आधिकारिकं द्रुतप्रतिक्रियापृष्ठेन राष्ट्रपतेः नूतनवीजाशुल्कवृद्धेः विषये सामाजिकमाध्यममञ्चेषु मिथ्यावार्तानां पुष्टिनां च खण्डनं कृत्वा तथैव स्पष्टीकरणम् अधिसूचितम्।

# Navratri Festival- आश्विन-नवरात्रारम्भ, भक्तेभ्यः २२ होराः उद्घाटितानि भविष्यन्ति मातुः श्रीनयनादेव्याः द्वाराणि



**हिमसंस्कृतवार्ताः- बिलासपुरम्।** श्री नैनादेवीमन्दिरे सोमवासरादारभ्य श्रद्धा- भक्ति- महामहोत्सवः आश्विननवरात्रः प्रारभ्यते। नवरात्रमहोत्सवस्य कृते मन्दिरपरिसरं रङ्गिणीप्रकाशैः, अलङ्कारैः च अलङ्कृतम् अस्ति। मन्दिरन्यासप्रशासनेन नवरात्रिमेलानां सर्वाः व्यवस्थाः सम्पन्नाः। समाचारानुसारम् एतेषु नवरात्रेषु मातुः श्रीनयनादेवीमन्दिरस्य जनसमूहः श्रावणनवरात्रिषु अपेक्षया न्यूनः भवति। परन्तु मन्दिरन्यासप्रशासनेन भक्तानां अपेक्षितप्रवाहस्य प्रतीक्षया विस्तृतसुरक्षाव्यवस्था कृता। भक्तानां सुविधायै मन्दिरं २२ होरां यावत् उद्घाटितं भविष्यति। अर्धरात्रे १२ वादनतः प्रातः २ वादनपर्यन्तं मन्दिरद्वाराणि एव पिहितानि भविष्यन्ति।

### षड्क्षेत्रदण्डाधिकारिणः नियोजिताः

मेलाक्षेत्रं ९ क्षेत्रेषु विभक्तं कृत्वा षड् क्षेत्रदण्डाधिकारिणः नियुक्ताः येन भक्ताः कामपि असुविधां न प्राप्नुयुः। मेलायां २०० गृहरक्षकपुलिसकर्मचारिणः नियोजिताः, भक्तानां सुविधायै आयुर्वेदिकस्वास्थ्यविभागैः स्वास्थ्यसहायताकेन्द्राणि स्थापितानि, ये २४ होराः उद्घाटिताः भविष्यन्ति।

### मन्दिरपरिसरे ध्वनिप्रसारयन्त्राणां प्रयोगे प्रसादार्पणे च प्रतिबन्धः

भक्तानां विशालं जनसमूहं दृष्ट्वा मण्डलप्रशासनेन मन्दिरसङ्कुलस्य परिसरे च अनेकाः आवश्यकाः प्रतिबन्धादेशाः कार्यान्विताः सन्ति। एतेषु प्रतिबन्धेषु मन्दिरसङ्कुलस्य २२ सितम्बरतः अक्तूबर २ पर्यन्तं ढोलकः, वाद्ययन्त्रं च इत्यादीनां कस्यापि प्रकारस्य ध्वनिप्रसारयन्त्रस्य उपयोगः पूर्णरूपेण निषिद्धः भविष्यति। सार्वजनिकघोषणा केवलं नियन्त्रणकक्षद्वारा एव भविष्यति। अपि च मन्दिरसङ्कुले प्रसादस्य उपयोगः अपि कठोररूपेण निषिद्धः भविष्यति।

### बृहत्वाहनानाम् आवागमनमपि प्रतिबन्धितम्

सुचारुयातायातप्रवाहं निर्वाहयितुम् टोबातः श्री नैनादेवीमन्दिरपर्यन्तं मार्गे केवलं बसयानानां लघुयात्रीवाहनानां (टैक्सी) च अनुमतिः भविष्यति। ट्रक, कैन्टर, ट्रैक्टर, टेम्पो इत्यादीनां बृहत्वाहनानां गमनम् पूर्णतया प्रतिबन्धितं भविष्यति। अपि च, यात्रिकान् वहन् किमपि ट्रकयानम्, टेम्पो, ट्रैक्टरयानं वा हिमाचलप्रदेशसीमायां गरामोडा- ग्वालथाईई- भाखड़ास्थानात् परं मन्दिरं प्रति गन्तुं न शक्नोति। एतेभ्यः स्थानेभ्यः केवलं बसयानेन वा टैक्सीयानेन वा भक्ताः मन्दिरं प्राप्तुं शक्नुवन्ति। अनुज्ञापत्रयुक्तानां वाहनानां एव मन्दिरं गन्तुं आगन्तुं च अनुमतिः भविष्यति। अन्यानि वाहनानि घवाण्डले निरुद्धानि भविष्यन्ति।

### उपायुक्तः मन्दिरन्यासायुक्तः च किं वदति

उपायुक्तः तथा मन्दिरन्यासस्य आयुक्तः राहुलकुमारः आश्विननवरात्रस्य सर्वाः व्यवस्थाः सम्पन्नाः इति अवदन्। मन्दिरन्यासः भक्तानां कृते उत्तमसुविधाः प्रदातुं प्रयतते।

# ए यद् एवम् इहा(+आ) नू स्यात् हृदी द्वे स्तां मे जीवे हे

**(Sanskrit Version of Hindi film song-**

## काश कहीं ऐसा होता के दो दिल होते सीने में")



ए यद् एवम् इहा(+आ) नू स्यात्
हृदी द्वे स्तां मे जीवे हे
ए यद् एवम् इहा(+आ) नू स्यात्
हृदी द्वे स्तां मे जीवे हे
एकभग्नेऽपि जाते हा इह
एकभग्नेऽपि जाते हा इह
कष्टं ना स्याद् भो जीवे हे
कष्टं ना स्याद् भो जीवे हे
ए यद् एवम् इहा(+आ) नू स्यात्
हृदी द्वे स्तां मे जीवे हे ---- (००)
सत्यं वदन्ति ....
सत्यं वदन्ति पिबन्तः लोकाः
शोकः माद्यं जायते
कोऽपि हा अस्तु रोग ए हृत्कः
दुःखं जायुः भवेदीह
दाहदग्धं हृदयं चेद्धि
दाहदग्धं हृदयं चेद्धि
शङ्का किं स्यात् पाने भोः
आ शङ्का किं स्यात् पाने भोः
ए यद् एवम् इहा(+आ) नू स्यात्
हृदी द्वे स्तां मे जीवे हे
एकभग्नेऽपि जाते हा इह
एकभग्नेऽपि जाते हा इह
कष्टं ना स्याद् भो जीवे हे
कष्टं ना स्याद् भो जीवे हे ---- (०१)
विस्मृतिः मे ना ही शक्या
शोकोऽयं नू(+उ) स्थास्यति
कयाऽपीहाऽऽशु कष्टं दत्तं
यत्सदा पीडेह तप्स्यति
भरं न हा शक्यम् ए हृद्कष्टं
भरं न हा शक्यम् ए हृद्कष्टं
सकृद् बहुशो दिवसेषु
सकृद् बहुशो दिवसेषु
ए यद् एवम् इहा(+आ) नू स्यात्
हृदी द्वे स्तां मे जीवे हे
एकभग्नेऽपि जाते हा इह
एकभग्नेऽपि जाते हा इह
कष्टं ना स्याद् भो जीवे हे
कष्टं ना स्याद् भो जीवे हे
ए यद् एवम् इहा(+आ) नू स्यात्
हृदी द्वे स्तां मे जीवे हे ---- (०२)

रचयिता - डॉ. रुरुकुमारमहापात्रः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

# श्रीमद्भागवतप्रवचनम्- ३४



✎असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

नारदमुनिः अब्रवीत्- 'धन्योऽस्मि, अनुगृहीतोऽस्मि अहम्। अहं सर्वपापहारिणं भगवन्तं श्रीहरिं प्राप्तवान्। हे तपोधनाः! अहं श्रीमद्भागवतस्य श्रवणं हि सर्वेषु धर्मेषु श्रेष्ठं मन्ये; यतोहि अस्य श्रवणात् वैकुण्ठवासिनः श्रीहरेः प्राप्तिर्जायते' इति। सूतमुनिः अकथयत्- 'शौनक! वैष्णवोत्तमः नारदः यदा एवं कथयन् आसीत्, तदैव तत्र योगेश्वरः शुकदेवः समायातः। कथासमाप्तेः अनन्तरं हि व्यासनन्दनः शुकदेवः तत्र समागतः। षोडशवर्षीयः सः, आत्मलाभेन पूर्णः, शशिसमः ज्ञानरूप- महासागरस्य संवर्धनार्थं, सः शनैः शनैः श्रीमद्भागवतं प्रेम्णा पठन् आसीत्। एवं तत्र समागतं परमं तेजस्विनं शुकदेवं दृष्ट्वा समस्ताः सभासदः, झटिति उत्थितवन्तः, ततः एकस्मिन् उच्चासने तं सश्रद्धं स्थापितवन्तः। पुनः देवर्षिः नारदः तस्य प्रेमपूर्वकं पूजनं कृतवान् । शुकदेवः सुखपूर्वकम् उपविश्य- 'भवन्तः मम निर्मलवाणीं शृण्वन्तु' इत्युक्तवान्।

शुकदेवः अब्रवीत्- 'हे रसिकाः एवं भावुकाः जनाः! एतत् श्रीमद्भागवतं वेदरूपं, कल्पवृक्षस्य परिपक्वं फलमस्ति। श्रीशुकदेवरूपस्य शुकस्य मुखसंयोगात् अमृतरसेन परिपूर्णमस्ति। अत्र केवलं रसः हि वर्तते, न वा अत्र त्वच्बीजादिकं स्यात्। एतद् अस्मिन्नेव लोके सुलभमस्ति। यावत् शरीरे चैतन्यं स्यात्, तावत् भवन्तः वारं वारम् अस्य पानं कुर्वन्तु। महामुनिना व्यासदेवेन श्रीमद्भागवतमहापुराणस्य रचना कृता। अत्र निष्कपट- निष्कामभावेन परमधर्मस्य निरूपणं कृतमस्ति। अत्र शुद्धान्तःकरणैः सत्पुरुषैः ज्ञातस्य, प्राप्तस्य च कल्याणकारिणः एवं वास्तविकवस्तुनः वर्णनं प्राप्यते, यस्माच्च त्रितापानां शान्तिर्भवति। एतस्य अवलम्बनस्य अनन्तरम् अपरशास्त्रस्य अथवा साधनस्य आवश्यकता नास्ति। यदा कश्चन पुण्यात्मा पुरुषः अस्य श्रवणस्य इच्छां करोति, तदा ईश्वरः अविलम्बेन एव तस्य हृदि अवरुद्धः इव तिष्ठति। एतत् भागवतं पुराणानां तिलकमस्ति, एवं वैष्णवानां परमं धनम्। अत्र परमहंसैः प्राप्तस्य विशुद्धज्ञानस्य हि वर्णनमस्ति। ज्ञानवैराग्यभक्तिभिः सह निवृत्तिमार्गः अत्र प्रकाशितः अस्ति। यः पुरुषः सभक्ति अस्य श्रवणं, पठनं, मननम् इत्याद्यर्थं सदैव तत्परः तिष्ठति, सः मुक्तः भविष्यति। एषः रसः स्वर्गलोके, सत्यलोके, कैलासे तथा वैकुण्ठेऽपि न उपलभ्यते। भवन्तः एतस्य सदैव पानं कुर्वन्तु, एतं मा मुञ्चन्तु कदाचिदपि इति, शुभम्। (माहात्म्यम् -०६/ ७५-८३)




**नन्दिनी-** नमो वः। अद्यतने 'अध्येता' इत्यस्य वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। प्रथमा वार्ता अस्ति यत् अमेरिकादेशस्य राष्ट्रपतिना हेच्वन्बी-प्रवेश-पत्राय नूतन- आवेदकेभ्यः एव प्रतिवर्षम् एक- लक्ष-डॉलर-शुल्कं प्रस्तावितम्।

**नन्दिनी-** आम्, महत् प्रस्तावम्। द्वितीया वार्ता अस्ति यत् केरल-उच्च-न्यायालयेन निर्णीतम्, यदि महमदीयपुरुषः सर्वासां पत्नीनां भरणपोषणं कर्तुं न शक्नुयात्, तर्हि सः बह्वीः पत्नीः न स्थापयेत्।

**काव्या-** उचितः एव निर्णयः। तृतीया वार्ता अस्ति यत् जम्मु-काश्मीर-प्रान्तस्य अनन्तनाग-मण्डले अधिकारिभिः ड्रोन-विमानानाम् उड्डयनं प्रतिषिद्धम्।

**नन्दिनी-** देशरक्षणाय उत्तमं कार्यम्। चतुर्थी वार्ता अस्ति यत् अन्ताराष्ट्रिय-तट-स्वच्छता-दिवसे भारतीय-तटरक्षकबलं देशव्यापि-प्रयत्नानां नेतृत्वं कृतवत् अभूत्।

**काव्या-** सत्यम्, प्रशंसनीया सेवा। पञ्चमी वार्ता अस्ति यत् एकः अमेरिकीयः अधिकारी उक्तवान् अभूत् यत् नूतननियमान् श्रुत्वा हेच्वन्बी-प्रवेशपत्रधारिभिः भारतीयैः न त्वरणीयम् इति।

नन्दिनी- अद्य एतावदेव। पुनः मिलामः। धन्यवादः।

ईदर-धीरजः हैदराबादः

# दुर्गापूजायाः अवसरे प्रशासनस्य कठोरनिर्देशाः



हिमसंस्कृतवार्ताः- कुणाल कौशिक, मोतिहारी

दुर्गापूजायाः सन्दर्भे जिला-प्रशासनेन विशेषाः आदेशाः निर्गताः। सर्वेषां पूजा-समितीनां कृते मूर्तिस्थापनायाः अनुमतिपत्रग्रहणम् अनिवार्यं कृतम्। अनुमतिपत्रं बिना मूर्तेः स्थापना न अनुमन्यते।सरकारस्य आदेशानुसारं पूजा-मण्डपे विसर्जन- यात्रायां च डीजे-वाद्यस्य प्रयोगे पूर्णः प्रतिबन्धः स्थापितः। यः कश्चन एतत् नियमं लङ्घयति, तस्य विरुद्धं कठोरं वैधानिकं कार्यं करिष्यते। दुर्गापूजायाः शांतिपूर्णं आयोजनं सुनिश्चितुं चतुर्सहस्रं पुलिसबलं नियुक्तं भविष्यति। चत्वारिंशद् QRT-दलानाम् अपि गठनं कृतम्। पुलिस- अधीक्षकः स्वर्णप्रभातः अवदत् यत्, सोशलमीडिया-माध्यमेषु अपि प्रशासनस्य तीव्रा दृष्टिः भविष्यति। यः कश्चन मिथ्या प्रसारयति, तस्य विरुद्धं दृढं कार्यं भविष्यति।